नं० ४८६२

नाम– श्यामापूजापद्धतिः

कर्त्ता– ×

पत्रसंख्या – २४ पत्राणि सं० ×

विषयः– तंत्रम्

मंत्र

॥ अपामामृजापद्धतिः ॥ व १

ॐ स्वस्ति श्रीमहागणपतये नमः । अथ रूपामायायाः पूजापद्धतिर्लिख्यते
कलानिधिकलोल्लासिमौलिस्मेरकरांबुजां कालिंदीलोलकल्लोलकोमलां श्यामलां भजे यद्यपि
पद्धतयोऽस्याः संति बह्व्यस्ताः कृताः कृतिभिः रूपाभासोऽस्य सपर्यान्तां तथापि कुर्वामिनैर्वचनैः प्रा-
तःकृत्यमहत्वात्तु यो देवीभक्तिनोर्चयेत् तस्य पूजा च विफला शौचहीनाय या क्रिया । अथ ब्राह्मे
मुहूर्ते चोत्थाय बद्धपद्मासनः शिरस्याधोमुखसहस्रदलकमलकर्णिकामध्यवर्त्तिनं चंद्रमंड-
लांतर्गतहंसपीठे श्रीनाथं ध्यायेत् यथा शुद्धस्फटिकसंकाशं महाज्ञानतिमिरापहं शुभ्रांशुकयुगसंका-
शं क्षौमद्वयविराजितं प्रफुल्लेंदीवराकारलोचनद्वितयान्वितं गंधानुलेपनं शांतं वराभयकरद्वयं
वामोरुन्यस्तशक्तिसंयुक्तं शुभ्राभरणभूषितं स्वदक्षपादक्षहस्तेन धृतवामकलेवरं वामे धृता-
मलाम्भोजस्फुरत्कायाः स्फुरच्छोभनं परानंदरसोल्लासिलोचनद्वयपंकजं इति ध्यात्वा ॐ लं पृ-
थिव्यात्मकं गंधं समर्पयामीति नासाग्रावद्धं तत्त्वेन गंधकरयोरंगुष्ठेन कनिष्ठिकां स्पृशा

राम: १

न्दद्यात् हं आकाशात्मकं पुष्पं तर्ज्जन्यंगुष्ठाभ्यां यं वाय्वात्मकं धूपं अंगुष्ठतर्ज्जनीभ्यां रं वह्न्या
त्मकं दीपं अंगुष्ठमध्यमाभ्यां वं अमृतात्मकं नैवेद्यं अंगुष्ठानामिकाभ्यां दद्यात् ॐ लं हं यं रं वं इति तां
वूलसमर्प्पणं सर्वात्मकं तांवूलं योनिमुद्रया दत्वा ऐं क्रीं श्रीं हसखफ्रें ह्सः हः मलवरयूं सहक्ष
फ्रूं अमुकानंदनाथभैरवी अमुकदेव्यंबाभैरवी श्रीपादुकां पूजयामीति मंत्रं दत्वाऽशानतथाज
पेत्· ततो नमस्कुर्यात्· ऐं अखंडमंडलाकारं व्याप्तं येन चराचरं तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः
अज्ञानतिमिरांधस्य ज्ञानांजनशलाकया चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः इति प्रणाम्य प्रक्कवीम·
नमस्ते नाथ भगवन् शिवाय गुरुरूपिणे विद्यावतारसंसिद्ध्यै स्वीकृतानेकविग्रह· भवाय शिवरूपा
य परमानंदरूपिणे सर्वज्ञानतमोभेदभानवे चिद्घनाय ते· स्वतंत्राय विधिक्लृप्तविग्रहाय शिवात्म
ने परतंत्राय भक्तानां भक्तानां भव्यदायिने· विवेकिनां विवेकाय विमर्ष्याय विमर्षिणां प्रकाशिनां
प्रकाशाय ज्ञानिनां ज्ञानरूपिणे· पुरस्तात्पार्श्वयोः पृष्ठे नमस्कुर्यादुपर्य्यधः सदा सच्चित्स्वरूपेण

ह्लक्ष्म
हस्ख्फ्रें
मलवर
यीं

२ विद्धोहिनिजदासता त्वत्प्रसादादहं देव कृतकृत्योऽस्मि सर्वतः मायास्तु महापाशाद्विमुक्तोऽस्मि
शिवस्य च · इति स्तुत्वा प्रातरुद्भूति स्नायांते स्नायादि प्रातरनंतरः यत्कर्मे भिजगन्नाथतदस्तु तवपू
जनं इमनेन सर्वान्निर्विघ्न पूजार्थं मानाभ्यनीयततःपादस्तव लिंगांशं न धारयां कुण्डलिनी मात्मानं निर्मला
नंदं चिंतयेत् · अथ मूलाधार चतुर्दल पद्म कर्णिकास्था योनि मध्याधो मुख स्वयंभू लिंगवेष्टिनी
प्रसुप्त भुजगाकारा सार्द्धवर्त्ताकारेण सार्द्धत्रिवलयां मृणालतंतुनिभाम् अरुण दिवाकरकोटि
पाटलां विद्युत्कोटि [illegible] भां चंद्रकोटि सुशीतलां स्फुरद्दीपशिखाकृतिं मूलविद्यामयीं विंदुनादशि
३ वशक्तिरूपिणीं कुंडलिनीं ध्यात्वा हूंकारेण हंसमंत्रेण मंत्रेण चरणांतेन वाम्त्र शिखिशिखा योगा २
त्संचेतनां विधाय मूलाधारस्वाधिष्ठानमणिपूरानाहतविशुद्धाज्ञा संज्ञक षट्चक्राणि लिंगत्र
यं च शिखा सुषुम्णामार्गेण सहस्रदलकमले नीत्वा परमशिवेन योजयित्वा तयोः सामरस्यमा
नंदमयं विचिंत्य चंद्रमंडलाद्विंदुरूप अमृतधारया संतर्प्य मूलं यथाशक्ति प्रजप्य तस्याः प्रभायां कुलगु

था

रून्ध्यायेत्· तद्यथा· महाशयरसोल्लासहृदयाघूर्णलोचनाः कुलालिंगनसंभिन्नघूर्णिताशेषतामसाः कुलशिष्यैः परिहृताः पूर्णानंदकरणोद्यताः वराभयकराः सर्वे कुलतत्वार्थवादिनः। इति ध्यात्वा ऐं ऐं प्रह्लादानंदनाथाय नमः ऐं सकलानंदनाथाय नमः ऐं कुमारानंदनाथाय· ऐं वसिष्ठानंदनाथाय· ऐं क्रोधानंदनाथाय· ऐं सुकानंदनाथाय· ऐं बोधानंदनाथाय· ऐं ध्यानानंदनाथाय· इति संपूज्य अष्टौ कुलगुरून्प्रणम्य परात्परशक्तिर्ह्रीं श्रीं क्लीं· प्रीणयेती पुनः स्वस्थानसमानीय देवीं रूपेऽहं ब्रह्म ते शाहमित्यात्मानं चिंतयेत्· ततः सकृद्द्रमेखले देवि पर्वतस्तनमंडले विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे इति भूमौ पादं स्वासानुसारेण दत्वा बहिर्गत्वा कुलवृक्षान्वीक्ष्य प्रणम्यावरूपकं कृत्वा ऐं ह्रीं वामदेवाय सर्वजनप्रियाय नमः इति दंतधावनं कृत्वा देवीगृहं गत्वा निर्माल्यमपकृष्यार्घं दत्वा स्नानार्थं तीर्थं गछेत्· तद्यथा· देवीरूपं जगद्विभाव्य ऐं आत्मतत्वाय स्वाहा· ऐं विद्यातत्वाय स्वाहा ऐं शिवतत्वाय स्वाहा· इत्याचम्य· कुलदर्भमनामिकातर्जनीभ्यां धृत्वा· मलापकर्षणस्नानं पूजार्थस्नानाय संकल्प्य· त्रिकोणचक्रं विभाव्य सूर्यमंडलादंकुशाकृद्य गंगे चेति मंत्रेण तीर्थमावाह्य· देवतापादोदकमयं तीर्थं विभा

२ म॰ अस्त्रेणासंरक्ष्य कवचेनावगुण्ठ्य वमिति धेनुमुद्रयामृतीकृत्य मूलं दशधा जप्त्वा सप्त छिद्राणि नि
रुध्य॰ त्रिर्निमज्य॰ कुंभमुद्रया मूलमंत्रांते अमुकदेवीमभिषिंचामीति तेनात्मशिरसि त्रिरभिषिंच्योक्ता
स्य कामं मयावस्त्रयुगं परिधायाचम्य ॐ मणिधरि वज्रिणि महाप्रतिसरे रक्ष रक्ष हूं फट् स्वाहेति मं
त्रेण शिखां बध्वा मूलेन तिलकं कृत्वा वैदिकसंध्यां तर्पणं विधाय तांत्रिकसंध्यातर्पणे कुर्यात् य
था॰ तत्वत्रयेणाचम्य॰ षडंगं विन्यस्य वामहस्ते जलं गृहीत्वा हं यं वं लं रं इत्यभिमंत्र्य तत्वमुद्रयात्मशि
रसि मूलेन सप्तधाभ्युक्ष्य अवशिष्टोदकं दक्षिणहस्ते गृहीत्वा नासाग्रसमर्पणीय इड्याकृष्य देहां
तर्बहिर्निःसमस्तं पापं ब्रह्महत्यादि पिंगलया विरेच्य तज्जलं कज्जलनिभं पापपुरुषं विचिंत्य पुरः कल्पित
वज्रपाषाणे फडिति क्षिपेत्॰ इति तांत्रिकीसंध्यां विधाय तर्पणं कुर्यात्॰ तद्यथा जले यंत्रं विभाव्य रामः
तत्रैशान्याग्नेयनैर्ऋत्यवायव्यकोणेषु गुरुपरमगुरुपरापरगुरुपरमेष्ठीगुरून् तर्पयामीति २
संतर्प्य॰ मध्ये गुरुपत्नीं संतर्प्य॰ देवीमावाह्य॰ मूलविद्यांते महाकालसहितदक्षिणाकालिकां

मातङ्ग्युत्पत्तामिति पंचविंशतिवारं संतर्प्य· महाकालं त्रिः संतर्प्य· कालयादिपंचदशशक्तीर्यथास्थानं विभा
व्यैकैकांजलिना तर्पयेत्· भैरवाष्टकमथ ब्रह्मादीनामपि तर्पणं कुर्यात्· ततो दूर्वाक्षतरक्तचंदनादिना अर्घं
गृहीत्वा ॐ क्रीं हंसः कुलमार्तण्डभैरवप्रकाशशक्तिसहिताय सप्तदशनक्षत्रयोगसहिताय इदमर्घ्यं स्वाहे
ति सूर्यायार्घं निवेद्य सूर्यमंडले देवीं विभाव्य ॐ उद्यदादित्यमंडलवर्तिन्यै शिवचैतन्योदितायै महाकालस
हितदक्षिणकालिकायै एषोर्घः स्वाहेति त्रिरर्घं दत्वा कालिकायै विद्महे श्मशानवासिन्यै धीमहि तन्नो
घोरे प्रचोदयात् इति गायत्रीमष्टोत्तरशतं जपेत्· ततो यागमंडपद्वारं गत्वा सामान्यार्घं कुर्यात्· तद्यथा·
देहल्यग्रतश्चतुरस्रवृत्तत्रिकोणमंडलं कृत्वा तत्र ॐ अस्त्राय फडित्यस्त्रमंत्रेण पात्रं प्रक्षाल्य साधारण
संस्थाप्य· ॐ क्रां हृदयाय नमः इति मंत्रेण पूर्य गंगे चेति तीर्थमंत्रेणांकुशमुद्रया तीर्थमावाह्य· ॐ का
रमुखरत्नाक्षपुष्पाणि क्षिप्य प्रणवेन त्रिरभिमंत्र्य· धेनुमुद्रां प्रदर्श्य तदुदकेनास्त्रमंत्रेण द्वारमभ्युक्ष्य· गं
धपुष्पाक्षतैर्द्वारदेवताः पूजयेत् तद्यथा· द्वारस्योर्ध्वोदुम्बरायां ॐ विघ्नाय नमः ॐ महालक्ष्म्यै नमः

४ सरस्वत्यैनमः दक्षिणशाखायां विघ्नेशायनमः वामशाखायां क्षेत्रेशाय॰ दक्षिणे गंगायै॰ वामे यमुना
यै॰ दक्षिणे धात्रे॰ वामे विधात्रे॰ दक्षिणे शंखनिधये॰ वामे पद्मनिधये॰ अथो देहल्यां अस्त्राय फट्
नमः इत्येव पूर्वद्वारमारभ्योत्तरद्वारपर्यंतं पूजयित्वा तद्द्वाराधिपान्पूजयेत्॰ देहल्यग्रतो दक्षिणवामक्रमे
ण पूर्वद्वारे ॐ ब्रह्माण्यै नमः ॐ माहेश्वर्यै॰ दक्षिणे ॐ कौमार्यै॰ ॐ वैष्णव्यै॰ पश्चिमद्वारे ॐ वाराह्यै॰
ॐ इंद्राण्यै॰ उत्तरद्वारे ॐ चामुंडायै॰ ॐ महालक्ष्म्यै नमः इति द्वारपूजां विधाय मूलमंत्रमस्त्रमंत्रं च वाम
नासायां जपन् दिव्यदृष्ट्या दिव्यान् ऊर्ध्वाधस्तालत्रयेणांतरिक्षान् पार्ष्णिघातत्रयेण भौमान्विघ्नानु
त्सार्य अपसर्पंतु ते भूता ये भूता भुवि संस्थिताः ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया इत्यक्षतप्र
रः क्षेपेन विघ्नान्निरं ततः स्वर्वांगं संकोचयन् दक्षिणांगेन वामशाखां स्पृशन्वामपादपुरःसरं प्रविशे
त् कांस्यघंटां वादयन् कलशद्वारमध्ये वसेत्सुधीः पंचगव्यार्घतोयाभ्यां प्रोक्षयेन्मंडपांतरं॰ ततो मंडपाभ्यं
तरे ऐशान्यां ॐ ब्रह्मणे नमः ॐ वास्तुपुरुषाय नमः इति संपूज्य ॐ तीक्ष्णदंत महाकाय कल्पांतदहनो ४

पम भैरवायनमस्तुभ्यमनुज्ञां दातुमर्हसि अनेनभैरवाज्ञां गृहीत्वाजपस्थानंप्रोक्षयेत्· तद्यथा मूलमंत्रे
णानिरीक्ष्य अस्त्रमंत्रेण प्रोक्ष्य तेनैव दर्भैस्ताडयित्वा कवचेनाभ्युक्षयेदिति ततो मंडपांतरं धूपयित्वा वेदि
कायां विहितासनं संस्थाप्य मूलेन प्रणवेन वा श्रीस्वमातृकां भोज्ये चिंतयेत्· ततआसनं पूजयेत्· ॐ आ
धारशक्त्यै नमः कूर्माय अनंताय वाराहाय पृथिव्यै नमः इति संपूज्य आसनमंत्रस्य मेरुपृष्ठ ऋषिः सुत
लं छंदः कूर्मो देवता आसने विनियोगः पृथ्वि त्वयेत्यभिमंत्र्य ॐ ह्रीं आधारशक्तिकमलासनाय न
मः इत्यासनं पूजयेत्· ततस्तत्र स्वस्तिकवीरासनेनोपविश्य स्वासनस्याग्नेयकोणे ॐ गं गणपतये न
मः नैरृत्ये सं सरस्वत्यै नमः ॐ वायव्ये दुं दुर्गायै नमः ऐशान्ये क्षौं क्षेत्रपालाय नमः इति पूजयेत्· पुन
श्चरणानुपीठदेवताद्याश्चतुष्कोणेषु घटन्तुस्थापयित्वा त्वेतान्पूजयेदिति विशेषः ततः शिव
सूर्यस्याग्ने गुरोरथ दीपवज्ज्वलितस्यापि सन्निधानं प्रकल्पयेत्· एवमन्यतमस्थानमासाद्य द्रव्य
मासादयेत् तद्यथा स्वदक्षिणे गंधपुष्पादिकं पुरतोर्घपात्रं पाद्यादिपात्राणि वामेस्ववासितज

५ लकुंभं पुरतो दीपान्देवीपृष्ठे कुलद्रव्याणि स्वपृष्ठे करकं भाजनपात्रं स्थापयेदिति विधिः ॥
ततः पुष्पाभिमंत्रणं यथा । ॐ वज्रोदके हूं फट् स्वाहेति जलमधिष्ठाय ॐ शतामिषेके समय
श्रिये समयाश्रये हूं फडिति पुष्पमामंत्र्य । ॐ पुष्पकेतुराजार्हते शतागताय सम्यक्संबुद्धाय ।
ॐ पुष्पे पुष्पे महापुष्पे सुपुष्पे पुष्पभूषिते पुष्पचयावकीर्णे हूं फडिति पुष्पमभिमंत्र
येन्मूलेन प्रणवेन वा षोडश चतुष्षष्टि द्वात्रिंशन्मात्राभिः पूरककुंभकरेचकक्रमेण
क्रमोत्क्रमात्प्राणायामत्रयं कुर्यात् । अथ भूतशुद्धिः ततः सुनालछोटिकाभिर्दशदि
ग्बंधनं कृत्वात्मनश्चतुर्दिक्षु रमिति वह्निप्राकारं ध्यात्वा ॐ क्षीरके हूं फट् स्वाहेति
हृदि हस्तं दत्वात्मरक्षां विधाय नरुणोल्का सर्वान्साधकोवामकर्णे श्री भैरवकानंद
नाथाय भैरवगुरुपादुकां पूजयामीति गुरुं गं गणपतये नमः इति दक्षिणे गणेशं ५

भो लोम्मूलदेवताप्रणाम्यभूतशुद्धिं कुर्यात् · तत्र पादादि जानुपर्य्यन्तं पृथ्वीमंडलं चतुरस्रं पीतवर्णं वज्रलांछि
तं निवृत्तिकला ब्रह्मदेवत्यं लं वीजयुक्तं ध्यायेत्तस्मिन्सेव · जान्वाद्याधारपर्य्यन्तमंवुमंडलमर्द्धचन्द्राकारं शुभ्रवर्णंप
द्मलांछितं प्रतिष्ठाकलापद्मलांछितं विष्णुदेवत्यं वं वीजयुक्तं ध्यायेत् · आधारादि हृदयपर्य्यन्तं अग्निमंडलं
त्रिकोणं रक्तवर्णं स्वस्तिकलांछितं विद्याकला रुद्रदेवत्यं रं वीजयुक्तं ध्यायेत् · हृदादि कण्ठपर्य्यन्तं वायुमं
डलं षट्कोणं धूम्रवर्णं बिन्दुलांछितं शान्तिकला ईश्वरदेवत्यं यं वीजयुक्तं ध्यायेत् · कण्ठादि शिरोन्तमाका
शमंडलं वर्तुलाकारं शुक्लवर्णं विंदुलांछितं शान्त्यतीताकला सदाशिवदेवत्यं हं वीजयुक्तं ध्यायेत् · लं पृथ्वी
मप्सु वं मापोग्नौ रं वह्निं वायौ यं वायुमाकाशे हं आकाशं पंचतन्मात्रासु तन्मात्रा अहंकारे अहंकारं महत्तत्वे
महत्तत्वं परायां शक्तौ परांशक्तिं परब्रह्मणि मनसा प्रविलापयेत् · ततो वामकुक्षौ पापपुरुषं ब्रह्म
हत्याशिरस्कं स्वर्णस्तेयभुजद्वयं सुरापानहृदायुक्तं गुरुतल्पकटिद्वयं तत्संसर्गपदद्वंद्वमंगप्रत्य
गपातकं उपपातकरोमाणं रक्तश्मश्रुविलोचनं खड्गचर्मधरं कृष्णं कुक्षौ पापं विचिन्तयेत् इति ध्यात्वा·

६ तेन पापपुरुषेणासह स्वशरीरस्पर्यं वं इति मंत्रैः शोषदाहप्लवनानि प्राणायामत्रयं विधाय निःपापपिंडं कृत्वा पाद्य-
लमिति पृथ्वीवीजेन शरीरं दृढीकृत्य सोऽहमिति चैतन्यं कृत्वा आद्य शिवसमीपात् कुलकुंडलिनी पंचमहाभूतकानि
वीजं स्वस्वस्थानं प्रापयित्वा तत्र विश्वव्यापकं परमामृतवारिणि सौवर्णं ब्रह्मांडमध्ये पीठं चिंतयेत् तद्यथा स्म-
6 शानं तत्र संचिन्त्य तत्र कल्पद्रुमं स्मरेत् तन्मूले मणिपीठं च नानामणिविभूषितं नानालंकारभूषाढ्यं नाना
देवैश्च वंदितं शिवाभिर्बहुमांसास्थिमोदमानाभिः ततः चतुर्दिक्षु शवाः कुंडा चितांगारास्थिभूषितं तन्मध्ये
भावयेद्देवीं यथोक्तध्यानयोगतः पीठं विचिंत्य तन्मध्ये आत्मानं मूलदेवतारूपं विभाव्य हृदि हंसं दत्वा लेलिहा
नमुद्रया वीजं न्यसेत् तद्यथा अस्य प्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुशिवा ऋषयः ऋग्यजुःसामानि छंदांसि
चैतन्यरूपा प्राणशक्तिर्देवता आं वीजं ह्रीं शक्तिः क्रौं कीलकं मम सर्वचैतन्यसिद्ध्यर्थं प्राणप्रतिष्ठामंत्रजपे वि
नियोगः इति स्मृत्वा शिरोवदनहृदयगुह्यसर्वांगेषु ऋषिछंदोदेवतावीजशक्तिकीलकान् विन्यस्य ॐ पृथिव्य ६
प्तेजोवाय्वाकाशात्मने अं कं खं गं घं ङं आं अंगुष्ठाभ्यां नमः शब्दस्पर्शरूपरसगंधात्मने इं चं छं जं झं ञं ईं तर्ज्ज-

स्वाहा
नीभ्यां नमः श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने उं टं ठं डं ढं णं ऊं मध्यमाभ्यां नमो वौषट् वाक्पाणिपादपायूपस्था-
त्मने एं तं थं दं धं नं ऐं अनामिकाभ्यां नमः कवचाय हूं वचनादानविहरणविसर्गानंदात्मने ॐ पं फं बं भं मं औं कनि-
१२ ष्ठिकाभ्यां वौषट् अंतःकरणमनोबुद्धिअहंकारचित्तविज्ञानात्मने अं यं रं लं वं शं षं सं हं लं क्षं अः करतलकर-
पृष्ठाभ्यां अस्त्राय फट् इति विन्यस्य हृदयादिष्वपि न्यसेत् ध्यानं रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढा
कराब्जैः पाशं कोदण्डमिक्षूद्भवमथ गुणमप्यंकुशं पुष्पबाणान् विभ्राणासृक्कपालं त्रिनयनविलसत्पी-
दा नवक्षोरुहाढ्या देवी बालार्कवर्णा भवतु शुभकरी प्राणशक्तिः परा नः इति ध्यात्वा आं ह्रीं क्रों यं रं लं वं शं षं सं हों
हंसः सोहं परमशिवप्राणा इह प्राणाः आमित्यादि वीजानुस्वार्ध्य अक्षरस्य जीव इह स्थितः आमित्यादि अम-
स्य सर्वेन्द्रियाणि आमित्यादि अक्षरस्य वाङ्मनश्चक्षुःश्रोत्रप्राणा इहागत्य सुखं चिरं तिष्ठंतु स्वाहा इति त्रिः पठे-
त् प्राणप्रतिष्ठां कुर्यात् मूलविद्यया ऋष्यादीन्न्यसेत् तथा अस्य श्रीदक्षिणकालीमंत्रस्य भैरव ऋ-
षिरनुष्टुप्छन्दः श्रीमहाकालसहितदक्षिणकालिकादेवता ह्रीं वीजं हूं शक्तिः क्रीं कीलकमनिरुद्ध-

७ सरस्वती कवित्वार्थे विनियोगः इतिस्मृत्वा शिरोवदनहृद्गुह्यपादसर्वांगेषु ऋषिछंदो देवतावीजशक्तिः की
लकानन्तान् मिकांगुष्टाभ्यां न्यसेत्. अथषडंगन्यासः ॐ क्रां अंगुष्टाभ्यां नमः क्रीं तर्ज्जनीभ्यां स्वाहा
क्रूंमध्यमाभ्यां वषट् क्रैं अनामिकाहूं क्रौं कनिष्टिकाभ्यां वौषट् क्रः करतलकरपृष्टाभ्यां अस्त्रायफ
डितिपंगुष्टाभ्यां विनलांतं विन्यस्य हृदयादिषु षडंगेष्वृतान्येवन्यसेत् ततो वर्णन्यासं कुर्यात् यथा ॐ अ
कारादिलृकारान्तान् दशावर्णान्हृदि ॐ अकारादि घकारांतान्दक्षिणभुजे ॐ ङकारादिटकारांता
न्वर्णान्वामभुजे ॐ णकारादिमकारांतान्वर्णान्दक्षिणजंघायां ॐ मकारादिक्षकारांतान्वर्णान्वा
मजंघायां प्रणवादिनमोंतमूलेनाशिरआदिपादांतं पादादिशिरोंतं व्यापकं पंचधात्रिधावान्यसेत्.
अथमातृकान्यासं कुर्वीत अथ मातृकामंत्रस्य ब्रह्माऋषिर्गायत्री छंदः मातृका सरस्वती देवता हलोवीजा
नि स्वराः शक्तयः अव्यक्तोकीलकं कालीमंत्रांगत्वेन मातृकान्यासे विनियोगः इति स्मृत्वा ऋष्यादीन्यथ ५
थास्थानं विन्यस्य अं कं खं गं घं ङं आं अंगुष्टाभ्यां नमः इं चं छं जं झं ञं ईं तर्ज्जनीभ्यां स्वाहा उं टं ठं डं ढं णं ऊं

मध्यमाभ्यां वषट् ऐं तं थं दं धं नं ऐं अनामिकाभ्यां नमः हुं ओं पं फं बं भं मं ओं कनिष्ठिकाभ्यां नमः वौषट् अं
यं रं लं वं शं षं सं हं लं क्षं अः करतलकरपृष्ठाभ्यां नमः अस्त्राय फट् एवं हृदयादिषु विन्यस्य मातृकां
ध्यायेत् पंचाशल्लिपिभिर्विभक्तविशदोहन्मध्यवक्षस्थलां भास्वन्मौलिनिबद्धचंद्रशकलामापीन
तुंगस्तनीं मुद्रामक्षगुणां सुधाढ्यकलशं विद्यां च हस्ताम्बुजे बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवतां
मातृकेयं इति ध्यात्वा अं नमो ललाटे आं नमो मुखवृत्ते इं ईं दक्षिणवामनेत्रयोः उं ऊं दक्षिणवामक
र्णयोः ऋं ॠं दक्षिणवामघ्राणयोः ऌं ॡं दक्षिणवामगंडयोः एं ऐं ऊर्ध्वाधरोष्ठयोः ओं औं ऊ
र्ध्वाधोदंतपंक्त्योः अं मस्तके अः मुखे कं खं गं घं ङं अभिबाहुबाहुमूलसंध्यग्रेषु चं छं जं झं ञं बाहुमूला
दिषु टवर्गं पंच दक्षिणजंघामूलादिषु तवर्गं पंच वामजंघामूलादिषु पवर्गं दक्षिणपार्श्वे कंहव
हंसो बिंदुमान् जीवो रावं वात्रिचतुष्कलं मायां नमामि च परं नास्मात् अस्मिन्न कीलितः एतदक्षराणां
मध्ये कश्चिदक्षर एक एव यस्मिन्मनोन स्यात् स मनुः कीलितः यस्मिन्मनौ भवत्येव अक्षररूपा

९ र्श्व सनकीलितइतिसर्वत्रनिर्णयः वामपार्श्वे वंनमः पृष्ठे भंनमः नाभौ मंनमः जठरे यंनमः हृदि रंनमः
दक्षांसे लंनमः घाटायां वंनमो वामांसे शंनमो हृदादिदक्षपाणौ षंनमो हृदादिवामपाणौ संनमो हृ
दादिदक्षपादे वामपादे हंनमः हृदादिवामपादे लंनमो हृदादि जठरे क्षंनमो हृदादिमुखे इतिवाहि
सृष्टिक्रमेण— बिंदुयुक्तविसर्गान्तानामपिमातृकाविन्यासस्थितिक्रमेणाऽकारादिक्षकारान्तव
र्णान बिंदुविसर्गान्तान्दक्षपादांगुल्यादिस्थानेषु विन्यस्य पुनः अकारादिवपर्यन्तान् ललाटादि
दक्षिणजानुपर्यन्तंन्यसेत् तथैव च क्षकारादि अकारान्तान्केवलबिंदुयुक्तान्वर्णान्यथास्थले
षु विन्यसेत् अथजपादिविलोमे सोहमादिमायादिश्रीबीजादिमातृकामपिशक्तौन्यसेत् ततः कला
न्यासंकुर्यात् तद्यथा अस्यतारोत्थकलामातृकामंत्रस्य प्रजापतिऋषिर्गायत्री छंदः श्रीशारदाक
लात्मिकामातृकादेवता हलोबीजानिस्वराःशक्तयः शक्तिभक्तांगत्वेनन्यासेवि॰ इतिऋष्यादिकं
स्मृत्वापूर्ववद्बहिन्यस्यकरांगन्यासंकुर्यात् तद्यथा अं आं हृदयायनमः इं ईं शिरसे स्वाहा ८

ॐ ऊं शिखायै वषट्। ॐ ऐं कवचाय हुं। ॐ औं नेत्रत्रयाय वौषट्। ॐ अः अस्त्राय फट्। इति पूर्ववत्क
रयोर्विन्यस्य ध्यानं कुर्यात्। यथा। हस्तैरब्जाक्षगुणमध्यहरिणीपुस्तकं वर्णमालां टंकं शुभ्रकपालं दर
ममृतलसद्धेमकुम्भं वहन्ती मुक्ताविद्युत्पयोदस्फुटिकनवजपापिंवकेरैः पंचवक्त्रैस्त्र्यक्षैर्वक्षोजनम्रां
सकलशशिनिभां शारदां तां नमामि। इति ध्यात्वा पूजयित्वा न्यसेत् तद्यथा। ॐ अं निवृत्त्यै नमो ललाटे।
ॐ आं प्रतिष्ठायै नमो मुखवृत्ते। ॐ इं विद्यायै नमो दक्षचक्षुषि ॐ ईं शान्त्यै नमो वामचक्षुषि ॐ उं —
नमो कायै दक्षकर्णे ॐ ऊं दीपिकाकलायै नमो वामकर्णे। ॐ ऋं रेचिकाकलायै नमः दक्षिणना
सिकायां। ॐ ॠं मोचिकाकलायै नमो वामनासिकायां ॐ लृं परायै नमः दक्षकपोले ॐ लॄं
सू— ायै नमो वामकपोले। ॐ एं सू— —मामृतायै नमः ऊर्ध्वोष्ठे ॐ ऐं ज्ञानामृतायै नमोऽधरे ॐ
ओं आप्यायिन्यै नमः शिरसि ॐ अः अनन्तायै नमो मुखाभ्यन्तरे ॐ कं सृष्ट्यै नमो दक्षबाहुमूले।
ॐ खं ऋद्ध्यै नमो मध्यसंधौ ॐ गं स्मृत्यै नमो मणिबंधे ॐ घं मेधायै नमोऽङ्गुलिमूले ॐ ङं कान्त्यै न

८ मोंगुल्पग्रे ॐ वं लक्ष्मेनेनमो वाहुमूले ॐ छं नमो कूर्परे मध्यसंधौ ॐ जं सुस्थिरायेनमो मणिवंधे ॐ
झं सुस्थितेनमो मणिवंधे गुलिमूले ॐ ञं मिश्रेनमो गुल्पग्रे· ॐ टं ज्वरायेनमो दक्षपादोरुमूले ॐ
9 ठं पालिन्येनमो जानुनि ॐ डं ऊर्ध्वायेनमो गुल्फे ॐ ढं ऐश्वर्येनमोंगुलिमूले ॐ णं अरत्मेनमो गुल्फा
ग्रे ॐ तं कामिन्येनमो वामोरुमूले· ॐ थं वरदायेनमो जानुनि ॐ दं ज्ञानिन्येनमो गुल्फे ॐ
धं प्रीत्येनमोंगुलिमूले· ॐ नं दीर्घायैनमो गुल्पाग्रे· ॐ पं तीक्ष्णायैनमो दक्षपार्श्वे ॐ फं रौद्र्यैनमो
वामपार्श्वे ॐ वं भयायैनमः पृष्ठे· ॐ भं निद्रायैनमो नाभौ· ॐ मं तंद्र्यैनमो जठरे· ॐ यं क्षुधेनमो व
हृदयमि ॐ रं क्रोधिन्येनमो दक्षांसे ॐ लं क्रियायैनमः ककुदि ॐ वं हायायैनमो वामांसे ॐ शं मृ
त्युरूपायैनमो हृदयादि दक्षहस्ते ॐ षं पीतायैनमो हृदयादि वामहस्ते· ॐ सं श्वेतायैनमो हृ
दयादि दक्षपादे· ॐ हं अरुणायैनमो हृदयादि वामपादे ॐ लं असितायैनमो हृत्पूर्वजठरे। १०
ॐ क्षं अनंतायैनमो हृत्पूर्वमुखे इति कला मातृकान्यासः अथ श्रीकंठादि मातृकान्यासः·

तद्यथा॰ ॐ अस्य श्रीकंठपूर्णोदर्यादिन्यासस्य श्रीदक्षिणामूर्तिऋषिर्गायत्री छंदः अर्द्धनारीश्वरो देव
ता हानसिद्ध्यर्थे विनियोगः इति स्मृत्वा यथास्थानं विन्यसेत् ह्सां ह्सीं ह्सूं ह्सैं ह्सौं ह्सः इति करांगेषु न्य
सेत्॰ ततो ध्यानं बन्धूककांचननिभं रुचिराक्षमालां पाशांकुशौ च वरदं निजबाहुदंडैः बिभ्राणमिं
दुकलाभरणं त्रिनेत्रमर्द्धांबिकेशमनिशं वपुराश्रयामः इति ध्यात्वा संपूज्य॰ उक्तस्थानेषु न्यसेत्॰ य
था ॐ ह्सौं अं श्रीकंठाय पूर्णोदर्य्यै नमः एवं आं अनंताय विरजायै नमः इं सूक्ष्मेशाय शाल्मल्यै नमः
ईं त्रिमूर्तये लोलाक्ष्यै नमः ॐ अमरेशाय वर्तुलाक्ष्यै नमः ॐ अ— शाय दीर्घघोणायै॰ ऋं भावभूतीशा
य दीर्घमुख्यै॰ ॠं अतिथीशाय दीर्घमुख्यै॰ ऌं स्थाण्वीशाय दीर्घजिह्वायै॰ ॡं हराय कुंडोदर्य्यै॰
एं झिंटीशाय गोमुख्यै॰ ऐं भौतिकेशाय विकृतमुख्यै॰ ॐ सद्योजाताय ज्वालामुख्यै॰ ॐ अनुग्र
हेशाय उल्कामुख्यै॰ औं अक्रूरेशाय श्रीमुख्यै॰ अः महासेनाय विद्यामुख्यै॰ कं क्रोधीशाय म
हाकाल्यै॰ खं चंडेशाय सरस्वत्यै॰ गं पंचांतकेशाय सर्वसिद्ध्यै॰ ॐ शिवोत्तमेशाय गौर्य्यै नमः॥

१० ॐ ङं एकरुद्रायै त्रैलोक्यविद्यायै० ॐ चं कूर्मेशाय मंत्रशक्त्यै० छं एकनेत्रेशाय आत्मशक्त्यै० जं चतु-
राननेशाय नागबुद्ध्यै० झं [illegible]ली शाय खेचर्यै० ड्डं दारुकेशाय मंजर्यै० ढं अर्द्धनारीश्वराय रू-
पिण्यै० णं उमाकान्तेश[illegible]रिण्यै० तं आषाढीशाय काकोदर्यै० थं दंडीशाय पूतनायै०
दं अद्रीशाय भद्रकाल्यै० धं मीनेशाय योगिन्यै० नं मेषेशाय शंखिन्यै० पं लोहितेशाय गर्जि-
न्यै० फं शिखीशाय कालरात्र्यै० बं छगलंडेशाय कुब्जिन्यै० भं द्विरंडेशाय कपर्दिन्यै० मं महा-
कालेशाय वज्रायै० यं त्वगात्मने वालीशाय जयायै० रं शोणिततत्वात्मने भुजंगेशाय० लं मांसा-
त्मने पिनाकीशाय रेवत्यै नमः वं मेदस्तत्वात्मने खड्गीशाय माधव्यै० शं अस्थितत्वात्मने बके-
शाय वारुण्यै० षं मज्जात्मने श्वेतेशाय वायव्यै० सं शुक्रात्मने भृग्वीशाय वक्त्रविदारिण्यै०। १०
हं प्राणतत्वात्मने नकुलीशाय सहजलक्ष्म्यै० ळं शक्तितत्वात्मने शिवेत्तत्वेशाय व्यापिन्यै०
ॐ क्षौः क्रोधात्मतत्वात्मने संवर्तकेशाय महामायायै० इति श्रीकंठन्यासः अथ षोढान्यासः।

केवलामातृकान्यासः ऐं अं ओं अकारादि क्षकारांतं न्यसेत्· ह्रीं अं ह्रीं अकारादि क्षकारांतं न्यसेत्· श्रीं अं श्रीं अकारादि क्षकारांतं न्यसेत्· अं श्रीं अं अकारादि हकारांतं न्यसेत् क्लीं अं क्लीं अकारादि हकारांतं न्यसेत् सर्वत्र ज्ञेयं अं क्लीं अं आका॰ ह्रीं अं ह्रीं अ का॰ मूलं मूल॰ अका॰ अं॰ मू॰ अं॰ क्ष लं लं॰ अका॰ केवलमूलविद्यामातृका॰ इति पादान्यासः मूलविद्यां पादादि जान्वंते आत्मतत्त्वाय स्वाहेति शिरसादिकंठांते मध्यखंडं नाभ्यंते विद्यातत्त्वाय स्वाहेति कंठादिनाभिपर्यन्तं तृतीयखंडं जान्वंते शिवतत्त्वाय स्वाहेति जान्वादिपादांतं एतावता न्यसेत्· ब्रह्मरंध्रे कपोले च भ्रूमध्ये वदने तथा कंठादि हृदयो चैव सप्तबीजानि क्रमान्न्यसेत्· अथ कुलंदीक्षितः स्वात्मनः संस्थाप्य भूतशुद्ध्यादीनि कारयित्वा पीठन्यासं कुर्यात् तद्यथा· हृदि ह्रीं आधारशक्त्यै नमः एवं कूर्माय नमः अनंताय॰ पृथिव्यै॰ पद्माय॰ नालाय॰ पत्रेभ्यो॰ केसरेभ्यो॰ कर्णिकायै नमः एवं सूर्यचंद्राग्निमंडलान्सत्वरजस्तमांसि· एवं स्कंधयुद्दक्षपार्श्वनाभिवामपार्श्वेषु धर्मज्ञानवैराग्यैश्वर्यान्· एवं दक्षिणांसमारभ्य पादावामोरुं तदंसेषु अधर्मादीन् विन्यस्य हृत्पद्मदलेषु

११ अधर्माज्ञानावैराग्यानैश्वर्यान् इच्छाज्ञानक्रियाकामिनीकामदायिनी रतिरतिप्रिया आनंदाः कृत्तिकायाम
नोन्मनामध्ये त्रिकोणे रेऽपरायै सत्त्वक्षर वकोणे वामकोणे अपरायै नमः दक्षकोणे विद्रूपायै नमः विंदु
चक्रे ह्रौं सदाशिवमहाप्रेतपद्मासनाय नमः इति विन्यस्य हृत्पद्मपीठासनस्थां मूलदेवीं ध्यायेत् ॥
अंजनाद्रिनिभां देवीं करालां करालवदनां शिवां मुंडमालावलीकीर्णां मुक्तकेशीं स्मिताननां रक्तपूर्ण
मकरवांभोजां मद्यपानप्रमत्तिकां वह्न्यर्कशशिनेत्रां नुरक्तविस्फुरिताननां विगतासुकिशोराभां
कृतकर्णावतंसिनीं श्मशानवह्निमध्यस्थां करकांचीनितंबिनीं खड्गमुंडवराभीतिसमन्वित
कराम्बुजामिति ध्यायेत्॰ ततो मानसिकमधुपर्काद्यपूजोपचारैरर्चयेत्॰ ततो घटस्थापनं कुर्यात्॰ तद्यथा॰
स्ववामे बिंदुषट्कोणाष्टदलचतुरस्रं विलिख्य सामान्यार्घोदकेनाभ्युक्ष्य नमः इति क्षालितं आधारं तत्र
संस्थाप्य तत्र धूम्रार्चिरादि दश वह्निकलाः संपूज्य॰ तत्र क्षालितं घटं संस्थाप्य॰ सूर्यमंडलमिष्ट्वा ११
पुष्पचंदनाद्यैः संपूज्य॰ मूलेन प्रपूर्य॰ तत्र सोममंडलं संपूज्य॰ मूलेन वीक्षणं विधाय॰ धेनुमु

पूजायित्वा·

ईश्याः। अतो ह्यन्यकुंभसमीपे त्रिकोणाक्तभूमंडले सर्वपार्थिकदेवताभ्यो बलिर्नमः इति तेभ्यो बलिं दत्वा दे
व्यसधूपितं कृत्वा पंचीकरणं कुर्यात्· तद्यथा· अस्त्राय फट् इति कुलद्रव्यं संताड्य हूं इत्यवगुंठ्य मूलेन वी
क्ष्य नमः इत्यभ्युक्ष्य· मूलमंत्रेण· मायया गंधं दद्यात्· इति पंचीकरणं ततो ॐ नमः इति कुंभपुष्पं
दत्वा मध्ये त्रिकोणं विलिख्य इति रिक्ष्वा ॐ वं वामदेवाय वौषट् इति वामदेवं संपूज्य ॐ हूं पशुपतये
अस्त्राय फट् इति पशुपतिं मध्ये त्रिरिख्वा क्रीं परस्वामिनि परमाकाशशून्यवाहिनि चंद्रसूर्याग्निभक्ष
णि पात्रं विशास्व स्वाहा इति द्रव्ये दशधा जपेत्· ॐ क्रीं श्रीं आनंदेश्वराय विद्महे सुदेव्यै धीमहि तन्नो अर्धना
रीश्वराय प्रचोदयात् इत्यानंदगायत्रीं त्रिर्जप्त्वा· हंसः शुचिषदिति त्रिर्जप्त्वा ॐ वां वीं वूं वैं वौं वः ब्र
ह्मशापविमोचितायै सुधादेव्यै नमः इति ब्रह्मशापमोचनं द्रव्योपरि दशधा जपेत्· ततः ॐ क्रां क्रीं क्रूं
क्रैं क्रौं क्रः सुधाकृष्णशापं मोचय अमृतं स्रावय २ स्वाहा इत्यपि दशधा जपेत्· ॐ एकमेव परं ब्रह्म स्थू
लसूक्ष्ममयं ध्रुवं कचोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहम् सूर्यमंडलसंभूते वरुणालयसंभ

२४ ॐ सां सीं सूं सैं सौं सः सुधाशुक्रशापं मोचय अमृतं स्रावय २ स्वाहा इत्यपि दशधा जपेत् २

१२ वे अमावीजमयं देवि नु उत्कृशापाद्विमुच्यतां देवानां ब्रह्मणो वीजं ब्रह्मानंदमयं यदि तेन सत्येन ते देवि
ब्रह्महत्यां व्यपोहतु इति शुक्रशापमोचनं त्रिर्जपेत् ह्रीं श्रीं छ्रां छ्रीं ह्रूं छ्रः रिकारे ति — भिनिविकारा
नस्पद्रव्यस्य हर २ स्वाहेति छ्रु रिकाख्यं त्रिर्जपेत् ततस्तिरस्कारिणीं ध्यायेत् नीलतुरगमधिरूह्य
पुरः प्रयांती नीलांशुकाभरणमाल्यविलिप्तगात्री निद्रापटेन भुवनानि तिरोदधाना खड्गायुधाभग
वती घरिपातुभक्तान् इति ध्यात्वा ह्रीं क्लीं ऐं क्लीं एं श्लौं तिरस्कारिणि सकलजनवाग्वादिनि सकलप
शुजनप्राणमनश्चक्षुः श्रोत्रजिह्वाघ्राणानि तिरस्कारिणि कुरु २ ठठ स्वाहेति त्रिर्मंत्रं जपेत् ॐ पावमा
नः परानंदः पावमानः परो रसः पावमानपरं ज्ञानं तेन ते पावयाम्यहं यमितिसंज्ञोऽप्यराभातिसदय
ह्रीं हंसः इति सौरमंत्रेण सूर्यमंडलं विचिन्त्य मस्तकोपरि हंसोऽहमिति विरूपां पठित्वा तद्गतामृत
तमयधारया हंसः इति जपन् धेनुमुद्रां बध्वा कुंभपूरणमित्युक्ता ह्रीं श्रीं त्रं ओं इं अमृते अमृतोद्भवे १२
अमृतवर्षिणि अमृतं स्रावय २ ओं अं अमृतेश्वर्यै नमः इत्यमृतमंत्रं सप्तधा जपेत् ततः कुलं कपूं

गंधैर्वासयेत्‌ ॐ विद्यातत्त्वाय स्वाहेति पठन्‌ योनिमुद्रां बध्वा आनंदभैरवं भैरवीं ध्यायेत्‌ यथा।
सूर्यकोटिप्रतीकाशं चंद्रकोटिसुशीतलं अष्टादशभुजं देवं पंचवक्त्रं त्रिलोचनं अमृतार्ण
वमध्यस्थं ब्रह्मपद्मोपरि स्थितं वृषारूढं नीलकंठं सर्वाभरणभूषितं पाशांकुशधरं देवं गदा
मुशलधारिणं खड्ग खेटक पट्टिश मुद्गरं शूलकुंतकं विचित्र खेटकं मुंड वरदाभयपा
णिनं लोहितं देवदेवेशं भावयेत्साधकोत्तमः इति ध्यात्वा हसक्षमलवरयूं आनंदभैरवाय
वषडित्यानंदभैरवं त्रिः संपूज्य तां ध्यायेत्‌ भावयेत्सुधादेवीं चंद्रकोटियुतप्रभां हिम
कुंदेंदुधवलां पंचवक्त्रां त्रिलोचनां अष्टादशभुजैर्युक्तां सर्वानंदकरोद्यतां प्रहसंतीं विशा
लाक्षीं देवदेवस्य संमुखां इति ध्यात्वा सहक्षमलवरयीं सुधादेव्यै वौषडित्यानंदभैरवीं त्रिः सं
पूज्य तत्र गंगादितीर्थमावाह्य द्रव्यमध्ये त्रिकोणं विलिख्य अकारादि षोडश १६ मकारादि १६ षोडश
त्रिकोणाग्रदक्षवामेषु विलिख्य मध्ये हलक्षं विलिख्य मूलाधारात्कुंडलिनीं शिवेन सह हसं

१३ यो ऽमामृतमयं द्रवं ध्यात्वा तयोरैक्यं विभाव्य तदुद्भवावहन्नासापुटेन कुंभे संयोज्यामृतमयं द्र
व्यं ध्यात्वा वमिति वरुणबीजं मूले घटं धृत्वा ऽष्टधा प्रजप्य गंधपुष्पाद्यैः कुंभं संपूजयेत् यमि
ति संशोष्य रमिति संदह्य वमिति संप्लाव्य लमिति दृढीकृत्य ब्रह्ममयं विभाव्य लक्ष्यारूपाणि
विं पिंडानु श्रासिंचतु प्रजापतिर्धाता गर्भं दधातु ते गर्भं देहि सिनीवालि गर्भं देहि सरस्व
ती गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ । हुं हुं लुं सुं लः अं अमृते अमृतोद्भवे अमृत
वर्षिणि अमृतं स्रावय स्वाहा इति कुंडगोलादीन्संशोध्य गुप्तेन घटे निक्षिप्य शेषं पूजार्थं
संरक्ष्य आत्मसिंहासनमध्ये विशेषार्घ्यं स्थापयेत् यथा त्रिकोणषट्कोणवृत्तचतुरस्र
मंडलं विलिख्य चतुरस्रकामरूपउड्डियानजालंधरपूर्णगिरिचलपीठान्संपूज्य षट्कोणषु
षडंगानि त्रिकोणे मूलखंडत्रयेण संपूज्य तत्र रमिति संदह्य वमिति संप्लाव्य लमिति
दृढीकृत्य ब्रह्ममयं विभाव्य ति दाहनं वमिति अमृतेनाप्लावनं धेनुमुद्रयादर्शनं चक्र १३

त्वा तदुपरि मूलं दशधा प्रजप्य ऋग्भिः क्रमेणाद्रोधयेत्॰ ॐ प्रतद्विष्णुस्तवते वीर्य्येण मृगो न भीमः
कुचरो गिरिष्ठा यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियंति भुवनानि विश्वा अनेन शुद्धेः शुद्धिः ॐ त्र्यंबकं
यजामहे सुगंधिं पुष्टिवर्द्धनं उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् इति मीनमीनत्रोध
नं ॐ तद्विष्णोः परमं पदं सदा पश्यंति सूरयः दिवीव चक्षुराततं तद्विप्रासो विपन्यवो जागृवां
सः समिंधते विष्णोर्यत्परमं पदं इति मुद्राशोधनं ॐ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि वि
शतु आसिंचतु प्रजापतिर्धाता गर्भं दधातु ते गर्भं देहि सिनीवालि गर्भं देहि सरस्वति गर्भं
ते अश्विनौ देवावाधत्तां पुष्करस्रजौ ग्लूं स्लूं क्लूं म्लूं ब्लूं ॐ अमृते अमृतोद्भवे अमृतवर्षिणि अ
मृतं स्रावय २ स्वाहा इति कुंडगोलोद्भवादीन् संशोध्य शुद्धेन घटे निक्षिप्य शेषं पूजार्थं स्थापयेत्॥
त्येवं इति चरत्नानि पूजयेत्॰ वक्ष्यमाणक्रमेण तत्र त्रिकोण वृत्त षट्कोण भूपुर पत्रिकां वि
न्यस्य रं अग्नये दशकलात्मने कालिकार्घ्यपात्रासनाय नमः इति संपूज्य वह्नेर्दश कलाः ४

१४ पूजयेत्. यं धूम्रार्चिषे नमः. रं ऊष्मायै नमः. लं ज्वलिन्यै. वं ज्वालिन्यै. शं विस्फुलिंगिन्यै. षं सुश्रियै. सं
सुरूपायै. हं कपिलायै. लं हव्यवहायै. क्षं कव्यवहायै. इत्याग्नेईशकलाः संपूज्य श्रीभगवतीद
क्षिणाकालिकाविशेषार्घं स्थापयामीति संकल्प्य तदुपरि महाशंखादि पात्रं स्थाप्य हंसः सू सं ३
र्यमंडलाय द्वादशकलात्मने अर्घपात्राय नमः इति संपूज्य ताः कलाः पूजयेत् यथा कं भं तपिन्यै
नमः खं बं तापिन्यै नमः गं फं धूम्रायै. घं पं मरीच्यै. ङं नं ज्वालिन्यै. चं धं रुच्यै. छं दं सुषुम्णायै. जं थं
भोगदायै. झं तं विश्वायै. ञं णं बोधिन्यै. टं ठं धारिण्यै. डं ढं क्षमायै. इति सूर्यकलाः संपूज्य मूल
विलोममातृकाख्यां श्रीपात्रं घटस्थद्रव्येण प्रपूर्य तत्र षोडशकलात्मने चन्द्रमंडलायार्घामृताय ने
म इति संपूज्य तत्कलाः पूजयेत् तद्यथा अं अमृतायै नमः आं मानदायै नमः इं पूषायै. ईं तुष्ट्यै. उं पु
ष्ट्यै. ऊं रत्यै. ऋं धृत्यै. ॠं शशिन्यै. ऌं चन्द्रिकायै. ॡं कान्त्यै. एं ज्योत्स्नायै. ऐं श्रियै. ओं प्रीत्यै.
औं अंगदायै. अं पूर्णायै. अः पूर्णामृतायै नमः इति सोमकलाः संपूज्य प्रणवकलाः पूजयेत् अं १४

निवृत्त्यैनमः आंप्रतिष्ठायैनमः इंविद्यायै॰ ईंशांत्यै॰ उंइंधिकायै॰ ऊंदीपिकायै॰ ऋंरेचिकायै॰ ॠं
मोचिकायैनमः ऌंपरायै॰ ॡंसूक्ष्मायै॰ एंसूक्ष्मामृतायै॰ अंहेमद्दपिरायै॰ अःअनंतायै॰ कंसृष्ट्यै॰ खंऋद्ध्यै॰ गंस्मृ
त्यै॰ घंमेधायै॰ ङंकांत्यै॰ चंलक्ष्म्यै॰ छंद्युत्यै॰ जंस्थिरायै॰ झंस्थित्यै॰ ञंसिद्ध्यै॰ टंजरायै॰ ठंपालि
न्यै॰ डंशांत्यै॰ ढंऐश्वर्यै॰ णंरत्यै॰ तंकामिन्यै॰ थंवरदायै॰ दंआह्लादिन्यै॰ धंप्रीत्यै॰ नंदीर्घायै॰ पं
तीक्ष्णायै॰ फंरौद्र्यै॰ बंभयायै॰ भंनिद्रायै॰ मंतंद्र्यै॰ यंक्षुधायै॰ रंक्रोधिन्यै॰ लंक्रियायै॰ वंउल्कायै॰ शं
मृत्युरूपायै॰ षंपीतायै॰ संश्वेतायै॰ हंअरुणायै॰ ळंअसितायै॰ क्षंअनंतायैनमः ॐ मितिसर्वत्र।
एवंप्रणवकलाःसंपूज्य॰ तत्रब्रह्मकलांतेहंसःशुचिरिति विष्णुकलांते प्रतद्विष्णुरिति रुद्रक
लांते त्र्यंबकंयजामहे इति ईश्वरकलांते तद्विष्णोः परमंपदमिति सदाशिवकलांते विष्णुर्योनिमि
ति पंचमंत्रान्पठेत् एवं चंद्रसूर्याग्नीनां अष्टत्रिंशत्कलाः प्रणवस्यैकपंचाशत् कलाः पंच
मंत्राश्चेति चतुर्नवतिमंत्रैः संपूज्य पंचरत्नानि पूजयेत् पूर्वे ॐ गगनलोकरत्नेभ्योनमः।

दक्षिणे ह्लूं स्वर्गलोकरत्नेभ्यो नमः उत्तरे ह्लूं पाताललोकरत्नेभ्यो ० पश्चिमे ह्लूं मर्त्यलोकरत्नेभ्यो नमः
मध्ये ह्लूं नागलोकरत्नेभ्यो नमः एवमर्घ्यपात्ररत्नानि संपूज्य अर्घमध्ये त्रिकोणं विलिख्य आदिका
दिथादिवर्णान्कोणेषु मध्ये हलक्षं च विभाव्य गंधपुष्पदूर्वाक्षतशुद्धिमीनमुद्राकुलामृता
न्यपि निक्षिप्य गंगेश्च यमुने चैव तिततीर्थमंत्रेण सूर्यमंडलादंकुशमुद्रया तीर्थान्यावाह्य आवाह
नाद्यष्टौ मुद्राः प्रदर्श्य भगहृत्कामंत्रेण मविविंसदृष्टदेवताबुद्ध्या धूपदीपौ प्रदर्श्य पवालावी तत्र यमाद्या
र्घ्य ब्रह्मांडरससंभूतमशेषरससंभवं आपूरितमहापात्रं पीयूषरसमावह अखंडैकरसानंद
करे परसुधात्मनि स्वच्छंदस्फुरणमत्रैव विधेहि कुलरूपिणि तद्रूपेनैकरस्यं दत्वा स्यंतत्स्वरूपिणि
परामृताकारं मथिविस्फुरणं कुर्वे अभिमंत्र्य अघिभभिमं अमूलदेवतारूपं भावयेत् अथ घटश्रीपा
त्रयोर्मध्ये पात्राणि स्थापयेत् यथा घटांते गुरुपात्रं ततः स्वभोगपात्रं ततः शक्तिपात्रं ततो योगि १५
नीपात्रं ततो वीरपात्राणि ततो दलिपात्रं ततः पाद्यपात्रं आचमनीयपात्रं मधुपर्कपात्रमिति नवपा

चारिं मधुघृतशर्कराभिर्मधुपर्कपात्रं सामान्यार्घवत्क्रमेणास्थापयेत् ततः अथ तत्त्वशुद्धिः तद्यथा क
रतले त्रिकोणं नवकोणं वा विलिख्य त्रिकोणाग्रवामदक्षिणकोणेषु वकारान्क्रमेण सहस्राशुद्धिचतु
ष्टयं गृहीत्वा ॐ आत्मतत्त्वेन स्थूलदेहं शोधयामि स्वाहेत्यग्रस्थां स्वीकृत्य ॐ विद्यातत्त्वेन स्थूल
सूक्ष्मात्रयं देहं शोधयामि स्वाहेति दक्षिणस्थां ॐ शिवतत्त्वेन स्थूलसूक्ष्माश्रयं देहं शोधयामि
स्वाहेति मध्यस्थां शुद्धिं स्वीकृत्य ॐ आर्द्रं ज्वलति ज्योतिर्ज्वलति ज्योतिरहमस्मि अहमेव हि मां जु
होमि स्वाहेति कुण्डलिनीमाजिह्वान्तामानीय ब्रह्मामृतबुद्ध्या श्रीपात्रादिद्रव्यं स्वीकारं कुर्यात् ॥ ॥
इति तत्त्वशुद्धिः ॥ ॥ अथ बलिदानं तद्यथा सिंहासनस्य पूर्वादिचतुर्दिक्षु चतुरस्रमण्डलानि वि
लिख्य तेषु बलिपात्राणि तेन बलिं दद्यात् आं ह्रीं तर्ज्जन्यंगुष्ठयोगेन ज्ञानमुद्रया वां वीं वूं वैं वौं वः
एह्येहि देवीपुत्र वटुकनाथ कपिलजटाभारभास्वर त्रिनेत्र ज्वालामुख सर्वविघ्नान्नाशय २ सर्वो
पचारसहितं बलिं गृह्ण २ स्वाहेति उत्तरभागे मध्यमांगुष्ठयोगेन गां गीं गूं गणपतये वरवरद

ॐ क्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः क्षेत्रपाल २

१६ सर्वजनं मे वशमानय सर्वविघ्नान्नाशय २ सर्वोपचारसहितं बलिं गृह्ण २ स्वाहेति पश्चिमे अनामिका
गुष्ठयोगेन यां यीं यूं यैं यौं यः योगिनीभ्यः सर्वविघ्नान्नाशय २ सर्वोपचारसहितं बलिं गृह्ण २ स्वा
हेति पूर्वोक्तस्थाने कनिष्ठिकांगुष्ठयोगेन यां यीं यूं यैं यौं यः योगिनीभ्य एष सर्वोपचारबलिर्नमः
तिदक्षिणे ऊर्ध्वं ब्रह्माण्डतो वा दिवि गगनतले भूतले निष्कले वा पाताले वा वने वा सलिले पर्वते १ चले
यत्र कुत्र स्थिता वा क्षेत्रपीठोपपीठादिषु चक्रितपदा धूपदीपादिकेन प्रीता देव्यः सदा नः शुभबलि
विधिना पातु वीरेंद्रवंद्याः इति प्रतिनिवेदनं जलं कुंकुमं वा दद्यात् अथ सर्वसमष्टियोगेन ॐ
ह्रीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यो हूं फट् एष बलिः सर्वभूतेभ्यः स्वाहेति व्यापकमण्डले बलिं दद्यात्।
अनामिकया वस्त्रेण वदद्यात् इति बलिदानं॥ ॥अथ बिंदुमायाविभूषिताधोमुखत्रिकोणा
पंचवृत्ताष्टदलवृत्तचतुरस्त्रचतुर्द्वारात्मकं यंत्रराजं गंधाष्टकेन विलिखेत् गंधाष्टकं यथा १६
स्वयंकुंकुमं कुंडगोलोत्थं रोचनागुरुः कर्पूरं मृगनाभिश्च मयं च मलयोद्भवं एष गंधः
यं

समाख्यातः सर्वदा चंडिकाप्रियइति अथयथोक्तमंत्रराजं चुरतः स्वर्णसिंहासनादौ निवेश्यपीठ
पूजांकुर्यात् तद्यथा॰ ॐ पर्यंकुपरिकालाग्निरुद्राय नमः मूलप्रकृत्यै नमः पंकजाद्य यधारिएय
आधारशक्त्यै॰ तस्यामूर्द्ध्नि नीलवर्णाय कूर्माय नमः तदुपरि कुंद सन्निभाय अनंताय नमः
तदुपरि वाराहाय नमः तस्यदंते पृथिव्यै नमः तस्योपरि सप्तसागराय नमः तत्रमणिद्वीपाय
नमः तत्रकादंबवनाय नमः तत्ररत्नगेहाय नमः तत्रश्मशानाय नमः तत्रकल्पवृक्षाय नमः॥ त
त्रमणिवेदिकायै नमः तत्ररत्नसिंहासनाय नमः तस्यपादौ धर्मज्ञानवैराग्यैश्वर्याणि आग्नेया
दिकोणेषु॰ अधर्माज्ञानदक्षहानवैराग्यानैश्वर्याणि संपूज्य मध्ये आनंदकंदस्य विन्नालाय नमः
सर्वतत्त्वात्मकपद्माय नमः प्रकृतिपत्रेभ्यो नमः विकारकेसरे पंचाशद्वर्णभूषितकर्णिका
यै नमः तत्रसूर्येन्दुवह्निमंडलानि सत्वरजस्तमांसि आत्मांतरितात्मपरमात्मज्ञानात्मनः पूज
नीयाः ततोऽष्टदलकेसरेषु वामावर्त्तेन पीठशक्तीः पूजयेत् तद्यथा॰ इच्छायै नमः ज्ञानायै नमः

१७ क्रियायै० कामिन्यै० कामदायै० रत्यै० रतिप्रियायै० आनंदायै० कर्णिकायां मनोन्मन्यै नमः०
ततो मध्यत्रिकोणाग्रकोणे ऐं परायै नमः ऐं अपरायै० ऐं विद्रूपायै नमः बिंदुचक्रे सौः सदा
शिवमहाप्रेतपद्मासनाय नमः इति पीठं संपूज्य कुसुमान्वितेः अंजलिं गृहीत्वा कामकला
रूपमात्मानं ध्यायन् अरविंदनाभिं विचिंत्य मूलाधारात्कुंडलिनीं शिवस्थाने संयोज्य चंद्रमंड
लाद्गलितामृतधारया संतर्प्य पुनः सुषुम्णामार्गेण हृत्कमलमानीय मानसैरुपचारैः संपू
ज्य यमिति वायुबीजमुच्चरन् वामनासामार्गेण यंत्रे आवाहयेत् तद्यथा· देवेशि भक्तिसुलभे परि
वारसमन्विते यावत्त्वां पूजयिष्यामि तावद्देवि इहावह इत्यावाहनादिमुद्राः प्रदर्शयेत्· यथा·
श्रीमहाकालसहितं दक्षिणकालिके इहागच्छ इत्यावाह्येह तिष्ठेह तिष्ठ इति संस्थाप्येह सन्नि
धेहि इति सन्निधाप्येह सन्निरुद्धा भवेति सन्निरुध्य इति कुसुमेन लेलिहानाख्यमुद्रया
जीवं न्यसेत्· यथा आं ह्रीं क्रों हंसः अस्याः जीव इह स्थितः एवं अस्याः सर्वेन्द्रियाणि· ७

एवं अमुष्या वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा इति त्रिसकृद्दत्त्वा जीव वि-
न्यस्य पंचदशकोणेषु मूलेन देवीमूर्त्तिं परिकल्प्य पंचदशकोणेषु देवीदेहनिर्गताः काल्यादि प-
ञ्चदशशक्तीर्ध्यायेत् यथा महीरूपाभा असिकराः मुंडमालाविभूषिताः तर्ज्जनीं वामहस्तेन धा-
रयन्त्यः सस्मिताः इति ध्यात्वा भैरवाष्टकं यथा दंडकमंडलुं पश्चादक्षसूत्रमथाभयं बिभ्रती कनका-
भा पायाद्ब्राह्मी कृष्णाजिनोज्वला। शूलं परश्वधः क्षुद्रदुंदुभिं नृकरोटिकां वहन्ती हिमसंकाशा ध्येया
माहेश्वरी शुभा। अंकुशं दंडखट्वांगौ पाशं च दधती करैः बंधूकपुष्पसंकाशा कौमारी कामदायि-
नी चक्रं घंटां कपालं च शंखं च दधती करैः तमालश्यामला ध्येया वैष्णवी विभ्रमोज्वला ब्राह्म्या-
द्याश्चापि पूर्वादिपत्रेषु ध्यायेत् ततो देवताभस्त्रमंत्रेण संरक्ष्य हूमित्यवगुंठ्य षडंगेन शकलीकृत्य
खड्गमुंडवराभीतियोनिमुद्राः प्रदर्श्य श्रीदक्षिणकालिके इदमासनमास्यतां इति मनसा रत्न-
सिंहासने निवेशयेत् ततो मूलविद्यामुच्चार्य महाकालसहितायै दक्षिणकालिकायै

१८ पाद्यं नमः इति पाद्यपात्रामृतेन पादपद्मयोर्दद्यात्· एवं अर्घ्यमर्घ्यः स्वाहा इति शिरसि दद्यात्· एवमाचम
नीयं नमो मुखे दद्यात्· एवं स्नानीयं नमः सर्वांगे गंधादिकं निवेद्य मूलेन रक्तवस्त्रयुगं परिधाप्य
मूलेनैव सर्वांगाभरणानि निवेद्य तर्जन्यंगुष्ठाभ्यां मूलं विधाय दक्षिणकालिकायै एष गंधो न
18 मः इति विहितगंधाष्टकं दत्वा मूलं विधाय एतानि पुष्पाणि वौषडिति मुकुटोपरि निवेद्य मूलं
विधाय महाकालसहितश्रीदक्षिणकां तर्पयामि इति श्रीपात्रामृतेन त्रिः सकृद्वा संतर्प्य· गुरुपा
त्रामृतेन आनंदभैरवभैरवी गुरुं च स्वस्वमंत्रेण शिरसि संतर्प्य· देव्या उत्तमांगाद् हृदाधारपाद
सर्वांगेषु कुसुमांजलिपंचनिवेद्य· धूपपात्रं फडिति प्रोक्ष्य मूलं विधाय महाकालसहितश्रीद
क्षिणकालिकादेव्यै दशांगधूपं निवेदयामि इति श्रीपात्रामृतेनोत्सृज्य वनस्पतिरसो दिव्यो ग
धाढ्यो गंधउत्तमः आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यतां इति धूपं दद्यात्· ततो दीपपात्रं म १८
ध्यमांगुष्ठाभ्यां स्पृष्ट्वा मूलमुच्चरन् दीपं निवेदयामि इति श्रीपात्रामृतेनोत्सृज्य सुप्रकाशो महा

न्दीपः सर्व्वतिमिरापहः सबाह्याभ्यंतरे ज्योतिर्दीपोयं प्रतिगृह्यतामिति दीपं दद्यात् ततोश्मपात्रं
सुवर्णादि पात्रस्थं चतुरस्रचतुष्कोणमूलस्याधारोपरि संस्थाप्य मूलेन निरीक्षित विशोध्यार्घोदकेन
संप्रोक्ष्य अनेन नैवद्यपुष्पं क्षिपेत् ततश्चक्रमुद्रां दर्शयित्वा मूलमष्टधा जप्त्वा धेनुमुद्रया अमृतीकृत्य
महामुद्रया परमीकृत्य चुलुकोदकमादाय मूलमुच्चार्य्य सांगाय सायुधाय सपरिवाराय महाका
लसहिताय दक्षिणकालिकायै नैवेद्यं निवेदयामीति श्रीपात्रामृतेनोत्सृजेत् हेमपात्रगतं दिव्यं
परमान्नं सुसंस्कृतं पंचधा षड्रसोपेतं गृहाण मम सिद्धये ॐ अमृतोपस्तरणमसि स्वाहेति दे
व्या वामहस्ते जलं निवेद्य वामकोण विकचोत्पल सन्निभा ग्रासमुद्रां दर्शयित्वा दक्षिणकरेण प्रा
णादि पंचमुद्राः प्रदर्शयेत् तद्यथा ॐ प्राणाय स्वाहेति अंगुष्ठकनिष्ठिकानामिकाभिः ॐ अपाना
य स्वाहेति अंगुष्ठतर्जनीमध्यमाभिः ॐ व्यानाय स्वाहेति अंगुष्ठमध्यमानामिकाभिः ॐ उदाना
य स्वाहेति अंगुष्ठादि सर्वाभिरिति प्राणादि पंचमुद्राः प्रदर्शयेत् ततो मूलेन ताम्बूलं निवेद्य पुनः

२८ पूर्ववत् त्रिः संतर्प्य पुरतस्य · श्रीदक्षिणकालिके देवि परिवारं संपूजयामीति देव्याज्ञां गृहीत्वा अ
ग्नीशासुरवायव्यामध्यदिक्षु नमो नार्च्य षडङ्गमन्त्रैः संपूजयेत् तद्देवताध्यानं यथा तुषारस्फ
टिकरूपाभहारमनीलारुणा त्रिधा वरदाभयधारिणः प्रधानतनवस्त्रियः इति ध्यात्वा गन्धपुष्पा
क्षतैः संपूज्य त्रिः सकृद्वा तर्पयेत् देवीदेहेति अत्र वह्निद्वय सिद्धो घमानवोघानां पूजनं कार्यं · ततः
पञ्चदश कोणाग्रेषु अग्रकोणमारभ्य सव्यामावर्तक्रमेण काल्यादि पञ्चदशशक्तीः पूजयेत् यथा
ॐ काली श्रीपादुकान्पूजयामीति त्रिः संपूज्य · योगिनीपात्रामृतेन त्रिः सकृद्वा तर्पयेत् ॐ
कपालिनी श्रीपादुकान्पूजयामीति ॐ कुल्ला श्रीपादु · इति प्रथमत्रिकोणे ॐ कुरुकुल्ला
श्रीपा · ॐ विरोधिनी श्रीपा · ॐ विप्रचित्ता श्रीपा · अपरत्रिकोणे ॐ उग्रा श्रीपादु · ॐ उग्रप्र
भा श्रीपा · ॐ दीप्ता श्रीपा · इत्यन्यत्रिकोणे ॐ नीला श्रीपादु · ॐ घना श्रीपादु · ॐ बला १९
का श्रीपा · इति तदन्तस्त्रिकोणे ॐ मात्रा श्रीपादुका · ॐ मुद्रा श्रीपा · ॐ मिता श्रीपादुकान्पू ·

इति मध्यत्रिकोणे ततो ऽष्टदलेषु ब्रह्माण्याद्यष्टशक्तीः पूजयेत्· अथ वायव्यादीशानपर्य्यंतं दिव्यसिद्धमा
नवौघगुरुपंक्तित्रयं यजेत्· महादेवी श्री पादुका॰ संपूज्य· गुरुपादुका· श्रीमहादिव्यंवा श्री पादुका॰
अमृतेन त्रिःसकृत्तर्प्पयेत् महादेवानंदनाथ श्री पादु॰ त्रिपुरानंदनाथ श्री पा॰ भैरवानंदनाथ
श्री पा॰ इति चलांशे दिव्यौघाः ब्रह्मानंदनाथ श्री पादु॰ पूर्णानंदनाथ श्री पा॰ चलचित्तानंद
नाथ श्री पादु॰ चलाचलानन्दनाथ श्री पा॰ कुमारानंदनाथ श्री पा॰ क्रोधानंदनाथ श्री पा॰ वर
दानंदनाथ श्री पा॰ स्मरदीपनानंदनाथ श्री पादु॰ मायांवा श्री पा॰ मायावत्संवा श्री पादुका॰
इति दश सिद्धौघाः विमलानंदनाथ॰ कुशलानंदनाथ॰ भीमसेनानंदनाथ॰ सुधा
करानंदनाथ॰ मीनानंदनाथ॰ गोरक्षानंदनाथ॰ भोजदेवानंदनाथ॰ प्रजापत्यानंदनाथ॰
मूलदेवानन्दनाथ॰ रतिदेवानंदनाथ॰ विघ्नेश्वरानंदनाथ॰ हुताशनानंदनाथ॰ संतोषानंद
नाथ· समयानंदनाथ॰ इति चतुर्दश मानवौघाः पूजनीयास्तर्प्पाश्च ततः स्वगुरुपरमगुरु

२० परापरगुरु परमेष्ठी गुरूनपि पूजयेत् गुरुपात्रामृतेन तर्प्पयेत्॥ अथवा पूर्वोक्तभक्त्यादानंदनाथादीन्पूजयेत्॥ अं आं असितांगभैरवयुतब्राह्मीश्रीपादुकां पूजयामीति संपूज्य योगिनीपात्रामृतामृतेन त्रिः सकृद्वा तर्प्पयेत् एवं इं ईं रुरुभैरवयुतमाहेश्वरी श्रीपादुकां॰ ऌं ॡं उन्मत्तभैरवयुतकौमारी श्रीपा॰ ऐं ऐं कपालीभैरवयुतअपराजिता श्रीपा॰ ओं औं भीषणभैरवयुतवाराही॰ अं अः संहारभैरवयुतनारसिंही श्री॰ ततो वहिर्हृतदिक्पालान्पूजयेत् यथा लां इन्द्रश्री॰ रां अग्निश्री॰ मं यमश्री॰ क्षां निर्ऋतिश्री॰ वां वरुणश्री॰ जं वायुश्री॰ सं सोमश्री॰ ह्यं ईशानश्री॰ निर्ऋतिवरुणयोर्मध्ये अधः ॐ क्लीं अनंतश्री॰ इन्द्रेशानयोर्मध्ये ऊर्द्ध्वे ॐ ब्रह्मश्री॰ तद्वहिश्चतुरस्रे पूर्वादिभ्यादक्षिणेष्वन्तद्वारेषु कोणेषु च वज्रादीन्पूजयेत् तथा ॐ वज्रश्री॰ ॐ शक्तिश्री॰ ॐ दंडश्री॰ ॐ खड्गश्री॰ ॐ पाशश्री॰ ॐ अंकुशश्री॰ ॐ गदाश्री॰ ॐ मुशलश्री॰ ॐ चक्रश्री॰ २० ॐ पद्मश्री॰ इत्येतान्पूजयेत्तर्प्पयेच्चेति आवरणपंचकं संपूज्य देव्यास्त्वाणि च संपूज्य पुनः

नैवेद्यं निवेद्य॰ ॐ जगद्ध्वनिमये भातः स्वाहेति घंटां संपूज्य वामेन वादयन् स्वर्णादि पात्रस्थ दीपैर्दे
शधानीराजयेत॰ ततः शुद्धिमीनादिकं तत्तीर्थशकलमादाय मूलान्ते इदं शुद्धामृतं द्वितीयस
हितं श्रीमहाकालसहितायै दक्षिणकालिकायै निवेदयामि नमः इति मृगमुद्रया पात्रं भुक्तोल्प॰
तलक्षकद्रयायत्नराजे त्रिधासंतर्प्य बिंदुचक्रे महाकालं संतर्प्य प्रणमेत एवं द्वितीयसहितं
दत्वा मुद्रासहितं निवेद्य ॐ कालि २ महाकालि इदं शुद्धामृतं पिब २ स्वाहां कुरु २ स्वाहेति प्र
तिनिवेदनं कृत्वा चतुर्थं ॐ शुद्धं सर्वरसास्वादपरमानंदनिर्भरे अपारे भवसंहारे पाहि माप सा ६
रमेश्वरीति प्रणमेत॰ ततो मूलेन प्राणायामत्रयं कृत्वा ऋष्यादिषडंगन्यासौ विधाय मालामादा
नीयकविन्यानं वामहस्तेन वादेवतायाजयेत पीठमूर्तौ वह्निं विसर्जयेत इति क्रमः इति नित्य
होमं कृत्वा मूलेन देव्यै पिशितादिभिर्बलिं हरेत॰ यथा दक्षिणे वामभागे वा चतुरस्रं त्रिको
णमंडलं कृत्वा तत्र देवीं मूलेन गंधपुष्पाक्षतैः संपूज्य॰ मूलमुच्चार्य॰ योगिनीचक्रपरिवारा

२१ ये महाकालसहिताये श्रीदक्षिणकालिकाये पिशिताज्योपस्कारसहितं श्वत्रभक्तमनेन व
लिं दद्यात् शाक्तो योगिनीचक्रं लिखित्वा धेनुमुद्रया तत्र प्रत्येकं परिवारदेवीभ्यो वलिं दद्यात्
ततः सुतृप्तां देवीं ध्यात्वा धेनुमुद्रया जलममृतीकृत्य अमृतापिधानमसि स्वाहेति देव्यै जलं
दद्यात् ततो गत्वसारं नैवेद्यं किंचिदुद्धृत्य ॐ चंडेश्वर्यै नमः इति दद्यात् उच्छिष्टभुजे एवमाचमनं द
द्यात् ततो देव्यै मुखप्रक्षालनजलं ताम्बूलं च दद्यात् ततो वलिं नैवेद्यं चोत्सार्य नैर्ऋत्यां दिशि
साधकेभ्यः धारयेत् ततः साष्टांगं दंडवत्प्रणामं सामकेभ्यः पात्राणि निवेद्य तैः सह पात्रग्रहणं कुर्यात् ॥ ॥
श्रीमंद्गरवंशोद्भव प्रविष्टलसत्स्वबुद्धान्तः सम्मिलितकेनाधीश्वरयोगिनीगणमहासिद्धैः समास
धितं आनंदागमकं महात्म्यमिदं साक्षात् त्रिखंडात्मं तद्देवी प्रथमकराम्बुजगतं पात्रं विशुद्धिप्रद
मिति प्रथमपात्रं जिह्वामूलानीतकुंडलिनीमुखकुंडे जुहुयात् १ हे मंत्रीन् रसावह २१
दयितयादत्तं च पथादिभिः किं सिद्धं चलरक्तपंकजदृशा सानंदमुत्क्षिप्तं वामस्वादुवि

शुद्धिशुद्धिकरणं पारोग निधायात्मके वंदे पात्रमहं द्वितीयमकनानंदैक संवर्द्धनमिति द्वितीयपा
त्रं सर्वाम्नायकलाकलापकलितं कौतूहलांदोलितं चंद्रोपेंद्रमहेंद्रशंभुवरणाब्रह्मादिभिः सेवि
तं ध्येयं देवगणैः परंम तिगणैर्मोक्षादिभिः सर्वदा वंदे पात्रमिदं तृतीयमकनास्वात्मावबो
धकृममिति तृतीयपात्रं मध्यंमीनरसावहं हरिहरब्रह्मादिभिः पूजितं मुद्राभेधकनधर्मकर्म
निरतं श्रीरामलतिकाश्रयं आचार्याष्टकसिद्धभैरवकला मांसेन संशोधितं यायात्पंचमकारत
त्वसहितं पात्रं चतुर्थं भजे इति चतुर्थपात्रम् आधारेभ जगणधिराजवलये पात्रं मही मंडलं
मध्यं सप्तसमुद्रवारिपिहितं चाष्टौ चादिग दंतिनः सोहं भैरव मद्ध्य यन्त्र तिदिनं तारागणै रहो
— रादित्यप्रमुखैः स्मराक्षरगणैः राह्वाकरैः किं करैरिति पंचमपात्रं प्रणाम्यपरामृतमहंतभा
वनागपरो निःशहं निर्विकारः कुंडलिनी मरवकुंडे जुहुयात् ॥ ॥यावन्न चलते दृष्टिर्यावन्न

सर्वधर्मकला पूर्णाधिकतमं वंदे मरवैर्भाषितं तृतीयागकुलाष्टकभ्रमतरणकुलं रहस्यान्वितम् ॥
आनंदोद्भवनादबिंदुकलयायोगिन्यवंद्रं स्वं पीतं अव्ययरसं मदोदयकरं पात्रं स्फधार्यञ्च मम इतिव ॥ ॥

चलतेमनः तावत्स्नानंचकुर्वीत पश्चात्पानमतः परं ततोमूलविद्ययाचरणावंतरितयापूर्णपात्रंकृत्वा

२२ साधकैःसहशांतिस्तोत्रादिपाठंकुर्यात ततोदेव्यग्रे शक्तिसंयोगंकुर्यात यथा ह्रांनमोललाटे ऑं

ह्रींनमोमुखे क्लींनमोहृदि ह्रूंनमोनाभौ सः ॐनाभिति विन्यस्य मूलमुच्चरन्शतंजप्त्वा ऑं

ह्रंल्लीं क्लेंअमुकीं द्रावय२ स्वाहा ऐंद्रीचपलेचपले चित्तेरेतोमंथ२ क्लौं लीं ह्वूं क्रौं इति ह्सः एवं

मंत्रंपठित्वा तस्याःकोणत्रये विन्यस्य पुष्पाक्षतैर्मूलेनपीठमभ्यर्च्य तत्रकामकलांध्यात्वानमः

शिवायेतिशिवमभ्यर्च्य धर्माधर्महविर्दीप्ते आत्माग्नौ मनसाश्रुचा सुषुम्नावर्त्मनानित्यमक्ष

वृत्तीर्जुहोम्यहंस्वाहेतिपठित्वा मूलंस्मरन्संयोगशक्तिक्षोभंकुर्वन् यथाशक्तिजपेत् ततोजपांते

प्रकाशाकाशहस्ताभ्यामवलंब्योन्मनाश्रुचा धर्माधर्मकलास्नेहपूर्णमग्नौजुहोम्यहमितिपूर्णा

हुतिंदत्वा ततस्तद्रूपयंत्रराजेतर्प्पयेत् ततश्चमहाकालसहितदक्षिणकालिकापराङ्गो रामः

स्वाद्यः स्वाहेतियंत्रेश्रीपात्रंसर्प्पणंकिंचिदुदकंदत्वा ॐ ततः पूर्ववत्प्राणबुद्धिधर्माधिकरण २२

श्री

तोज्ञात्वान्नसुषुप्त्यावस्थायां मनसावावाहस्ताभ्यां पद्मौमकरंदरेणाशी आयत्यमृतं यद्दुर्लभं तस्मात्तत्स
र्वं महाकालदक्षिणाकालिकाचरणे समर्पितमस्त्विति घटादिककुस्तकमाभ्यां सर्वं समर्प्य पात्रमधोमु
यं खीकृत्य तत्पुष्पांजलिं दत्वा तत्पात्रामृतेन स्निग्धभूमौ मायाबीजं विलिख्य वामहस्तकनिकया तिल
कं कृत्वा पादेनेन ॐ यं स्वज्ञाभिपादेने यं यं पश्यामि चक्षुषा स स्वयं दासतां याति यदि शक्रस
मो भवेत् ततो निर्माल्यपुष्पतांबूलेन इड्बद्धस्तविस्तृभ्यो बलिं दत्वा सूर्य्यं भुक्त्वा गणेशाय धर्मनायक
४६ वरुणाग्निभ्यः स्वधा निवेद्य शेषं गुरवे कुमार्य्यै साधकेभ्यो दत्वा शेषं स्वयं गृहीत्वा यंत्रलेखं ब्रह्मरं यं
ध्रे शिरसि पुष्पं दत्वा मातः पूजितासि क्षमस्वेति संहारमुद्रया पुष्पमाघ्राय तत्तद्वायु द्वारान्तर्वं
तेजः प्रवहन्नासामार्गेण सह सूर्यदले नीत्वा शिवं संगम्य सुषुम्नामार्गेण मूलाधारमानीयात्मा
नं कामकलारूपं विभाव्य ना ह्येवं ह्येवाचारपरायणो यथासुखं विहरेदिति ॥ ॥ इति श्री चक्रव
र्त्ति विरचितायां साधकानां स्मरणबोधनाय रत्नाकरसंगसर्व्व उपासाप्ट जापद्धतिः समाप्तिमगमत् ॥

२३ आद्यमाद्यंचमध्यंचमध्यंमध्यंतथोत्तमं अन्त्यमन्त्यंतथाद्यंचसेवन्नीश्चफलप्रदं निर्वाणत्रिपुरेशा
नी प्रणवेनदशाक्षरी ॐ ऐं २ ह्लीं ३ ऐं १ आद्यबीजं मध्यमे मध्यजपेन्यायः त्रैलोक्योत्पातिनोभूत
संघाः वज्रपाणस्यसर्वभाण्डोभवेयुः श्मशानभैरव श्मशानाधिपइमंसामिषान्नबलिं गृह्ण २ गरुल २
गृह्लापय २ विघ्ननिवारणंकुरु सिद्धिं प्रयच्छ स्वाहा इमंमंत्रंपठित्वा चतुर्दिक्षु चतुर्द्वारे चतुर्भैर
वेभ्यो बलिंदेयं तत्रोच्चारः श्मशानभैरवायएषबलिर्नमः पूर्वभैरवाय एषबलिर्नमः दक्षि
णकालायएषबलिर्नमः पश्चिमेमहाकालायएषबलिर्नमः उत्तरनिर्वने गृहाणेमंब
लिंमातर्हेहिमेसि द्विभुज्यमामं पश्चाद्दद्यावलिंदद्यात् श्रीः पशुं...सूक्तो
सि पूजाहोमादिकर्मसु तुष्टाभवतुसादुर्गासिरक्तपिशितैस्तवइतिप्रार्थ्य नारायणेपेविद्महेच
डिकायैधीमहि तन्नोरुद्रः प्रचोदयात् इतिपशुमभिषिंच्य पशुपूजांकृत्वा ग्रासंदत्वापशुकर्णे
देवि र्णेजपेत् ॥ ॐ ऐं क्लीं ह्रूं फट्स्वर्गंगच्छस्वाहा ॐ पशुपाशायविद्महे विश्वकर्मायधीमहि तन्नो रामः
२३

२४ रुद्रः प्रचोदयात् अद्येहेत्यादिदशावर्षावच्छिन्नतृप्तिकामनया एषच्छागबलिर्नमः घोर
दंष्ट्रेकरालास्ये मांसबलिप्रिये बलिं गृहाण देवेशि पशुरक्तसमांसकम्॥ ॥शुभम्॥

कालीतारामहाविद्याषोडशीभुवनेश्वरी भैरवीछिन्नमस्ता च विद्याधूमावतीतथा बगलासि २४
द्धविद्यामातंगीकमलात्मिका एतादशमहादेवि महाविद्याः प्रकीर्त्तिताः॥ ॥

[illegible]

[illegible]